শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ চতুশ্চৎৱারিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ চতুশ্চৎৱারিংশঃ সর্গঃ ॥

## প্রহস্তপুত্রস্য জম্বুমালিনো ৱধঃ

সন্দিষ্টো রাক্ষসেন্দ্রেণ প্রহস্তস্য সুতো বলী।
জম্বুমালী মহাদংষ্ট্রো নির্জগাম ধনুর্ধরঃ॥ **5.44.1** ॥

রক্তমাল্যাম্বরধরঃ স্রগ্বী রুচিরকুণ্ডলঃ।
মহান্ ৱিৱৃত্তনযনশ্চণ্ডঃ সমরদুর্জযঃ॥ **5.44.2** ॥

ধনুঃ শক্রধনুঃ প্রখ্যং মহদ্ রুচিরসাযকম্।
ৱিস্ফারযাণো ৱেগেন ৱজ্রাশনিসমস্বনম্॥ **5.44.3** ॥

তস্য ৱিস্ফারঘোষেণ ধনুষো মহতা দিশঃ।
প্রদিশশ্চ নভশ্চৈৱ সহসা সমপূর্যত॥ **5.44.4** ॥

রথেন খরযুক্তেন তমাগতমুদীক্ষ্য সঃ।
হনূমান্ ৱেগসম্পন্নো জহর্ষ চ ননাদ চ॥ **5.44.5** ॥

তং তোরণৱিটঙ্কস্থং হনূমন্তং মহাকপিম্।
জম্বুমালী মহাতেজা ৱিৱ্যাধ নিশিতৈঃ শরৈঃ॥ **5.44.6** ॥

অর্ধচন্দ্রেণ ৱদনে শিরস্যেকেন কর্ণিনা।
বাহ্ৱোর্ৱিৱ্যাধ নারাচৈর্দশভিস্তু কপীশ্ৱরম্॥ **5.44.7** ॥

তস্য তচ্ছুশুভে তাম্রং শরেণাভিহতং মুখম্।
শরদীৱাম্বুজং ফুল্লং ৱিদ্ধং ভাস্কররশ্মিনা॥ **5.44.8** ॥

তত্তস্য রক্তং রক্তেন রঞ্জিতং শুশুভে মুখম্।
যথাঽঽকাশে মহাপদ্মং সিক্তং কাঞ্চনবিন্দুভিঃ॥ **5.44.9**॥

চুকোপ বাণাভিহতো রাক্ষসস্য মহাকপিঃ।
ততঃ পার্শ্ৱেঽতিৱিপুলাং দদর্শ মহতীং শিলাম্॥ **5.44.10**॥

তরসা তাং সমুৎপাট্য চিক্ষেপ জৱৱদ্ বলী।
তাং শরৈর্দশভিঃ ক্রুদ্ধস্তাডযামাস রাক্ষসঃ॥ **5.44.11**॥

ৱিপন্নং কর্ম তদ্ দৃষ্টৱা হনূমাংশ্চণ্ডৱিক্রমঃ।
সালং ৱিপুলমুৎপাট্য ভ্রামযামাস ৱীর্যৱান্॥ **5.44.12**॥

ভ্রামযন্তং কপিং দৃষ্টৱা সালৱৃক্ষং মহাবলম্।
চিক্ষেপ সুবহূন্ বাণান্ জম্বুমালী মহাবলঃ॥ **5.44.13**॥

সালং চতুর্ভিশ্চিচ্ছেদ ৱানরং পঞ্চভির্ভুজে।
উরস্যেকেন বাণেন দশভিস্তু স্তনান্তরে॥ **5.44.14**॥

স শরৈঃ পূরিততনুঃ ক্রোধেন মহতা ৱৃতঃ।
তমেৱ পরিঘং গৃহ্য ভ্রামযামাস ৱেগিতঃ॥ **5.44.15**॥

অতিৱেগোঽতিৱেগেন ভ্রামযিৎৱা বলোৎকটঃ।
পরিঘং পাতযামাস জম্বুমালের্মহোরসি॥ **5.44.16**॥

তস্য চৈৱ শিরো নাস্তি ন বাহূ জানুনী ন চ।
ন ধনুর্ন রথো নাশ্ৱাস্তত্রাদৃশ্যন্ত নেষৱঃ॥ **5.44.17**॥

স হতস্তরসা তেন জম্বুমালী মহারথঃ।
পপাত নিহতো ভূমৌ চূর্ণিতাঙ্গ ইৱ দ্রুমঃ॥ **5.44.18**॥

জম্বুমালিং সুনিহতং কিঙ্করাংশ্চ মহাবলান্।
চুক্রোধ রাৱণঃ শ্রুৎৱা ক্রোধসংরক্তলোচনঃ॥ **5.44.19**॥

স রোষসংৱর্তিততাম্রলোচনঃ
প্রহস্তপুত্রে নিহতে মহাবলে।
অমাত্যপুত্রানতিৱীর্যৱিক্রমান্
সমাদিদেশাশু নিশাচরেশ্ৱরঃ॥ **5.44.20**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে চতুশ্চৎৱারিংশঃ সর্গঃ ॥